This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

षार

॥श्रीगणेशायनमः॥नत्वागणपतिंवंदेपरिभाषाख्यसूत्रकं॥उच्यतेकेशवेनेदंवेदाध्यायि
सुखाप्तये॥१॥तत्रादौमाध्यंदिनीयपरिभाषाः ऋकानांनवांकानांसूत्राणामध्येयेन
सूत्रेणपदमध्यातवर्णेषुसंज्ञाजायतेतद्वितीयपदादिवर्णेष्वेवएनेसंज्ञाजायतेत
दुच्यते॥पदादौचपूर्वाहस्वौद्विजोद्वारः॥संपूर्वयोश्छंदसि॥पदादौआद्याहल्विही
नयोर्वकारयकारयोःसंपूर्वयोश्चापानयोः॥ऋमाद्वित्वंषकारोद्वारःस्यात्छंदसि ॥१॥
॥१॥ माध्यंदिनीये॥हल्इतिव्यंजनंज्ञेयं॥अस्योदाहरणानि॥संहितायाःप्रथमाध्याय
प्रथमकंडीकायां॥वायवः॥द्वितीयकंडिका॥वसोःपवित्रं॥देवस्यत्वे-२८ स्येकंडिका
सुकुमध्ये॥संवपामि॥द्वितीयकंडिका॥यज्ञपतिः॥जनयत्यैत्वासंयौमीदं॥इत्यादि
षुपदादित्वात्संपूर्वत्वाच्चवययोर्द्वित्वंषकारोद्वारोनवकारयकारो॥इत्यादिज्ञेयं॥पदा
द्वित्वविधिः॥आद्यकंडिका॥ध्राजोवतीःप्राप्यायन्तु॥इत्यादिषुवकारयकारयोःपदादिद्वित्वंनोव

K.K.S.U. LIBRARY
RAMTEK
441 106
M-1733
Dist. Nagpur

Acc. No. ~~183~~ M-1733
Title - व्याख्याशिक्षा. (परिभाषासूत्र)
Author - दैवज्ञ केशव.
Date - A.D. 1776. (शके 1698) चैत्र कृ. (गुरु).
Sub - शिक्षा.
folio - 7
Xerox - 13
Scribe - विष्णुभट्ट भिकभट्ट बोडापूरकर.

Checked 2012

1

वान्नद्विसंयुकौरौतयोरिति ॥ आद्यहल्विहीनयोरिति किं ॥ द्वितियाध्याये ॥ अग्नेवाजजिह्वाजं ॥
तृतीयाध्याये ॥ प्रवनद्रमिस्र ऽमध्ये ॥ श्रेयसस्करद् ॥ यथानो इत्यनयोर्वकारयकार
योः पदादाद्वित्वमस्ति ॥ अतः द्वित्वस्योच्चारः ॥ वाजिजिह्वाजंत्वा ॥ श्रेयस्करद्यथानः ॥
एवमुच्चारे जायमाने आद्यहल्विहीनयोरिति वाजं यथा इत्यनयोस्तु आद्यहकार
हलयुक्तत्वान्न द्वित्वस्योच्चारः ॥ अग्नेवाजजिह्वाजंत्वा ॥ श्रेयसस्करद्यथानः ॥
एवमेवोच्चारो वकारयकारयोरिति ॥ वोच्चरार्थमन्यसूत्रे ॥ पदाद्यंतमध्ये ऋहर
युग्मस्य च ॥ पदाद्यंतमध्ये ऋकारहकाररेफैर्युक्तस्य पथ्यस्य योच्चारेण
स्याच्छंदसि ॥ उदाहरणानि ॥ अप्येन आप्येति ब्राह्मणमध्ये ॥ प्रथमाद्युक्त
कंडिकायां ॥ सामान्यग्निः ॥ अपि पिंचद्दचः ॥ द्वितियाध्याये ॥ संपरिदधिं इत
ऽमध्ये पाणिमिर्गृह्यमानः ॥ घेदोसि सेनरति कंडिकायां तेन सह्य घेदोस्याः ॥ इत

चीस्त्रो पुष्यौ ॥ इत्यादिषु ऋकार हकार रेफयुक्तत्वात् ॥ षकारो खारो न यकारः ॥ स्त्रार्थकारिका
पि ॥ पुर्वाह्ल्योः पदादौ च वेदे से पूर्वयोर्द्वयोः ॥ यस्याहं रेफयुक्तस्य खः पदाद्यंतमध्यके ॥ ॥
कारिकेति ॥ पखखुम्स्ते च पदाद्यंतमध्ये षकारस्य खकारोच्चारः ॥ स्याट्टवर्गं विना छं
दसि ॥ उदाहरणानि ॥ इषेत्वोर्जेत्वा ॥ इत्यत्र खकारो न षकारः ॥ इत्यादि ज्ञेयं ॥ एवं ब्राह्म
णापि ॥ इयं पृथिवी सर्वेषौ खा ॥ इत्यत्रापि खकारो न षकारः ॥ इत्यादि सर्वत्र ज्ञेयं ॥ ट ॥२॥
वर्गविनेति किं ॥ आषरुष्चि ॥ श्रेष्ठतमाद् इत्यत्र टवर्गयुक्तत्वात् षकारोच्चार एवं न
खकारः ॥ टवर्गं विना इत्यादि ज्ञेयं ॥ अथ लृशोल्हृ ह्वं रेफस्य रेकारः प्राक् च ॥ पदाद्यं
तमध्ये हलविहीनश्च ल्हृ ह्वं रेफस्य रेकारः प्रागुच्चारः स्याच्छंदसि ॥ वल्हे इति शाष
॥२॥ सहाज्ञेयः ॥ उदाहरणानि ॥ अष्टचिंर्शाद्ध्याये ॥ सप्तदशाकंडिकायां ॥ अभीममहि
मादिव इति दर्शितं ॥ इत्यत्रोर्ह्व रेफस्य प्रागेद रेकारोच्चारः ॥ ददेशातप्रिति ॥ नतुसो

र्द्धरेफोच्चारः॥ एकोनचत्वारिंशदध्याये॥ अग्निं हृदयेनेत्यत्र उरमध्ये पर्शव्येनेत्यत्रपरे
शव्येनेति॥ पंचमोध्यायांते॥ घंमा इति कंडिकायां॥ शतवल्शो वि रोह सहस्रवल्शा॥
इत्यत्र रलयोः सावर्ण्यात् लस्यापि प्राकृले कारोच्चारः॥ शतवल्शो वि रोह सहस्र
वल्शा इति॥ ननु लघुकौच्चारः॥ वसोः पवित्रमिति कंडी॥ ह्वार्षीत्॥ अत्रापि प्रा
कृरेकारोच्चारः॥ ह्वार्षीत्॥ षकारस्योदाहरणमेव सकारस्य॥ तत्कथं॥ इ एव
वर्गाभ्यां परस्य सस्य मूर्द्धन्य॥ इति हृस्वा रेफस्तु उरमध्ये वर्त्तते नहि रेफात्प
रो यः सकारः॥ स मूर्द्धन्य एवेति हृस्वा षकारस्य सकारयोरेकमेवोदाहरणं॥ द्वि
तीयाध्याये प्रथमकंडिकायां॥ बरेहिं रवेत्वो॥ बर्हिरसिद्ध्यनयोः॥ बरेहिरसित्येवमेवो
च्चारः॥ ननु सोर्द्धरेफोच्चारः॥ त्रयोविंशतिमे हिकंथंतः॥ इत्युरमध्ये न तु द्ब्लन्तु प

॥ ३ ॥

वल्हे हामसी यत्र वल्हे हामसीत्युच्चारः ॥ रल्हयोः स्सावर्ण्यं स्यात् ॥ एवं माध्यंदिनाख्ये
यानि ॥ हल्विहिनेति किं ॥ घसोः पवित्रमिति किं ॥ यज्ञपतिर्ह्णी एकत्रिंशदध्यायो ॥ ना
न्याऽ ओसीदंतरिक्ष ४७ शहिर्मी घोरियत्र हकारषकारयोर्वकारणकार हल्युक्ते
स्यादूर्ध्वं रेफयुक्त एवोच्चारो न प्राक् रेकारोच्चार इति ॥ शालिति किं ॥ इषेत्वोर्ध्वी
स्यैहो ॥ प्राप्यपतुदत्यत्र शाल्विहीनत्वात्सोर्ध्वं रेफ एवोच्चारो न प्राक् रेकारः इत्यादि
नीयं ॥ एतनर्थे कारिकापि ॥ वस्योच्चारः खकारस्याद्विना छंदसि स्यके ॥ विहेर्वी
ल्हाल्युर्ध्वं रेफोपः रेकारः प्राक् समुच्चारवत् ॥ २ ॥ अनुस्वारस्य ७ शालि रेफे च प
रे चहूस्वाद्दीर्घो दीर्घाद्ध्रस्वः संयोगे गुरुश्च ॥ पदाद्यंतमध्ये शालि रेफे च परे नुस्वा
रस्य ७ स्याद्ध्रस्वाद्दीर्घो दीर्घाद्ध्रस्वः संयोगे च परे गुरुः स्यात् छंदसि ॥ उदाहर
णानि ॥ तृतीयाध्याये ॥ त्रि ८ शद्धाम ॥ ब्राह्मणे स ८ पडिति ॥ द्वितीयाध्या

॥ ३ ॥

5

ये ॥ भूयासꣳ सुगृहपतिः ॥ तस्यामेव ॥ शतꣳ हिमाः ॥ तृतियाध्याये ॥ संत्वमग्ने इति
कंडिकायां ॥ द्वितिध्याये ॥ संप्रजया सꣳ रायस्पोखेनेति ॥ प्रथमाध्याये ॥ पृथिवी
देवयजनि इत्यध्ये ॥ पृथिव्याꣳ श्रातेन पात्रोः ॥ द्वादशाध्याये ॥ सुपर्णोसि इ
ति कंडिकायां ॥ यजूꣳषि नाम ॥ द्वितियाध्याये ॥ एषा ते इत्यध्ये ॥ सस्रवाꣳ
सं ॥ संबर्हिरंक्ताꣳ हविषा ॥ तृतीयाध्याये ॥ उभावामिति कंडिका ॥ विश्वाꣳ
रथीणां ॥ होता यक्षत्सु रेतसमित्यध्ये ॥ सुरयाभिषꣳ श्रियान मासरं ॥
आयुर्यज्ञेनेत्यध्ये ॥ चक्षुर्यज्ञेन कल्पताꣳ श्रोत्रं ॥ एकादशाध्याये ॥
दꣳष्ट्राभ्यां मलिम्लून् ॥ पुरोडाश्नौ हवीꣳ रख्या ॥ तृतीयाध्याये ॥ सोमानꣳ
स्वरणं ॥ संत्वमग्ने इत्यध्ये ॥ सप्तर्षीणाꣳ सुतेन ॥ पंचमाध्याये ॥ सि

ङ्त्यस्मि ॥ एवं रकारसंयोगपरेपि ज्ञेयमिति ॥ इत्यादिषु यथाक्रमेण दीर्घह्रस्वगुरुं
चाराः कार्यान्यस्मादिति ॥ शालिरेफे च परे किं ॥ इद्रायमागप्रजावतीत्यनयोरनु
स्वारः ॥ स्याग्रे हल्ये रेफाभावादनुस्वार एव न ङकारः ॥ कारिकापि ॥ अनुस्वा
रस्य ङ वेदे शालिरेफे परे भवेत् ॥ दीर्घाह्रस्वाद्ध्रुस्वादीर्घः संयोगे च परे गुरुः ॥ आदी
र्वीणाम् द्विनकादि पंचवर्गाणां द्वित्वं विसर्गाद्रेफयुक्तानां च ॥ पदादंतमध्येषार ॥४॥
वीणां द्वित्वं ङकारहीनकादिपंच ॥ वर्गाणां विसर्गात्परं पां रेफयुक्तानामेषां च द्वि
॥४॥ त्वंस्यादिति ॥ शार इति शषसा ज्ञेयाः ॥ उदाहरणानि ॥ अस्कन्नमघदेवेभ्य ॥
आपतेतिमध्ये पुष्करस्त्रजं ॥ समीद्दसीतिमध्ये ॥ कुस्याद्विरः ॥ कुल्मोस्याप
रेष्टः ॥ स्पर्श्व स्वापुरस्तात्सातु ॥ उपहूतो द्यौष्पितोपमां ॥ मयीदमिंद्र इत्यस्मिन्मध्ये ॥

दृधात्वस्मान् ॥ इत्यादिषु कादिवर्णानामेव द्वित्वं शार युक्तत्वान्नशषसानात् ॥ विसर्गाद्रेफ
युक्तानामुदाहरणं ॥ वंपरिधिमिरड्ध्ये ॥ अग्नेपिपं ॥ अस्याः अग्निमर्कंडिकायां ॥ =
व्हंतप्रस्तरेष्ठाः ॥ तृतीयाध्याये ॥ आन एतुमनः पुनः ध्रूले ॥ ऋकारहीनकादिपंचवर्गा
णामितिविकं ॥ इं धानास्वाहस्यञ्ध्ये ॥ वयस्कृतं ॥ सह स्कृतं ॥ मदसंस्थौ खारुद्र णामि ॥
इत्यत्र ककारतकारयोः ऋकारयुक्तत्वान्न द्वित्वं ॥ इत्यादि ज्ञेयं ॥ एतदर्थं कारिकापि ॥ व्यू घा
दृयः पंचवर्गाः शार्दीर्वां गुरुस्थैश्वते ॥ विसर्गाद्य परे तद्वद्युक्ताः स्फुटं दृसि स्फुटाः ॥ ४ ॥ द्वित्व
प्रसंगादन्यत्र यद्वित्वं तत्पाणिनीयसूत्राभ्यां ज्ञेयं ॥ तत्सूत्रे ॥ अनचिच ॥ अचः पर
स्य यरो द्वे वा स्तोन सचि ॥ अचो रहाभ्यां द्वे ॥ अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे
स्तूतास्तः ॥ अत्र अचयरज्ञापनार्थं प्रसंगाद्वर्णोच्चारस्थानज्ञापनोर्थं पाणिनीयसूत्रसंज्ञो

च्येते ।। अइउण् ।। ऋलृक् ।। एओङ् ।। ऐऔच् ।। हयवरट् ।। लण् ।। ञमङणनम् ।। झभञ् ।। घढधष् ।।
जबगडदश् ।। खफछठथचटतव् ।। कपय् ।। शषसर् ।। हल् ।। हलंत्यं ।। उपदेशेसंहलित्स्यात् ।।
उपदेशआद्योच्चारणं ।। आदिरंत्येन ।। सहेता ।। अंत्येनेतासहितआदिर्मध्यमानांस्वस्य
चसंज्ञास्यात् ।। इतिप्रत्याहाराः ।। अकुहविसर्जनीयानांकंठः ।। इचुयशानांतालुः ।। ऋ ।।५।।
टुरषाणांमूर्धा ।। लृतुलसानांदंताः ।। उपूपध्मानीयानामोष्ठौ ।। ञमङणनानांनासिकाच ।।
।।५।। एदैतोःकंठतालु ।। ओदौतोःकंठोष्ठं ।। वकारस्यदंतोष्ठं ।। जिह्वामूलीयस्यजिह्वा
मूलं ।। नासिकानुस्वारस्य ।। अचस्वराः ।। कइतिजिह्वामूलीयः ।। पइत्युपध्मानीयाः ।।
अंइत्यनुस्वारः ।। अःइतिविसर्जनीयः ।। पाणिनीयद्वियसूत्रयोरुदाहरणानि ।। प्रथ्यै
यथाध्याये ।। द्वितापाकंठिकायां ।। दधिव्याप्तिमातरि[illegible]नोधर्मोविश्वध्याऽअसि ।।
रस्वमाख्यामीथि तेइत्यादिद्विसंज्ञेयं ।। एतदर्थेकारिकाद्वमपि ।। पाणिनीयस्यसूत्राण्यांधिचं

सर्वत्रकीर्तितं ॥ नसोष्योश्च पदाद्यंतमध्ये वकारयकारयोः सकारस्य द्वित्वं न स्याच्छंद
सि ॥ उदाहरणानि ॥ क्षितिष्वाये ॥ क्षितिपन्ऋचि ॥ स्वासस्थं ॥ भुवनस्पतये स्वाहा ॥ प्रथ
माध्याये ॥ ह्यम्मीस्यवक्षत ७ रक्ष्यः ॥ इत्यादिषु सकारस्य वययोः परयोर्न द्वित्वं ॥ र
वेज्ञेयं ॥ हल्युतायुतस्योः रेकारस्य ॥ पदाद्यंतमध्ये हल्युतायुतस्य रेकारोच्चारः स्या
च्छंदसि ॥ उदाहरणानि ॥ छद्मोसीति ऋवर्णस्य रोत्र ॥ ऋक्ष्मोसीति उच्चारः ॥ नऋ
कारः ॥ अग्नेः इत्यत्र भ्रंश्ये ॥ पितृमते स्वाहा ॥ इत्यत्र पित्रमते स्वाहेत्युच्चारः ॥ अये
तेष्वा निर्ऋत्यियो इत्यत्र रेचियइत्युच्चारः ॥ इत्यादि ज्ञेयं ॥ कारिकापि ॥ वययोः परयोः
सस्य द्वित्वं न स्याच्छंदसि ॥ ऋकारो हल्विषु ग्युक्ते च रेकार च्छंदसि स्मृतः ॥ द्वि ॥ ह्रस्व
किंचिद्दीर्घ हल्युतायुताकारे हल्विसर्गेषु गवर्णे च न संहितायां ॥ पदाद्यंतमध्ये चाह
स्वस्या किंचिद्दीर्घोच्चारः ॥ स्याद्धल्युतायुत च्याकारे हल्विसर्गयुत वर्णे च परे न स्यो

10

वाजसनेयसंहितायां ॥ अस्योदाहरणानि ॥ इषे त्वोर्ज्जे त्वा वायव स्थ देवो वः ॥ इत्यादिषु इका
र यकार स्थकार स्तु ह्रस्वाः ॥ अतः एषां किंचिद्दीर्घोच्चारः ॥ न तु ह्रस्वता ॥ अत्र नकार हल्यु
त आकारो ग्रे तिष्ठति ॥ अतः सकार विकार योर्ह्रस्वतेन दीर्घोच्चारः ॥ प्राप्यं यतु ॥ पय
यो किंचिद्दीर्घता ॥ श्रेष्ठमाय ॥ अत्र मकार हल्युत आकारो ग्रे तिष्ठति अत स्तनका स्तकार ॥ इ
यो ह्रस्वैनैव ॥ यकर्म अत्र यकारस्य किंचिद्दीर्घता ॥ यकर्म राऽऽप्याय अत्र मकार रा
॥ इ॥ कार यो हल्युत आकारो ग्रेस्ति अतः ह्रस्वावेव ॥ यध्वमघ्या अत्र ध्वस्य किंचिद्दीर्घ
ता ॥ इन्द्राय भागं प्रजावती ॥ अत्र यघ्नयो रग्रे हल्युत आकारो ग्रेस्ति अतो ह्रस्वावेव ॥
यस्य किंचिद्दीर्घता ॥ अरणमीवाऽयक्ष्मा मा व स्तेन इत्यादिषु दिकार नकार अकार नका
राणां किंचिद्दीर्घोच्चारः ॥ अशनमा ॥ अत्र हल्युत आकारो ग्रेस्ति ॥ अतः शनयो र्ह्रस्वतैव ॥

घस्र ७ सोऽभ्रूवाउ अप्सित्र गोपतौ स्यात वक्री:॥ अत्र घकार पकार तकाराणां किंचिद्दीर्घ
ता:॥ स्रज मानस्य॥ अत्र मयुत आरोग्येस्ति। अत यजयोह्रस्वतैव। स्वस्य किंचिद्दीर्घ
ता:॥ पश्चन्पाहि॥ अत्र पकार हिकारयो: किंचिद्दीर्घोच्चार:॥ द्वितीयाध्याये॥ मित्रा
वरुणौ धौत्तरते:॥ अत्र वकार रुकारयो: किंचिद्दीर्घता॥ तकार रकारयोस्तु हल्वि
सर्गयुक्॥ अवर्ण: अग्रेस्ति॥ अत: ह्रस्वतैव॥ न दीर्घोच्चार:॥ इत्यादि सर्वग्रन्थेषु॥ वि
त्रिकारिकापि॥ ह्रस्वं दीर्घं न वेत्ति किंचित्संहितायां परो न चेत्॥ हल्संयुक्तेयु नाकारं स्व
वर्णो हल्विसर्गयुक्॥७॥ न वामपि चेत्स्वराणां परिमिता: कारिकास्त्विमा:॥ केशवे
नकृतास्तास्युर्वेदाध्यायिनबोधिका:॥८॥ परिभाषाख्यसूत्रं च यजुर्वेदसकारिकं॥
दैवविल्केशवेनेदं कृतं हस्तंस्वरान्विता॥९॥ ह्रस्वोदात्तादिभिर्वै [illegible] र्भेदैर्हस्तासे स्वरल

॥८॥

क्षणं ॥ शिक्षाद्विभिः श्लोकैर्गेशश्च लिह्ये यद्वेदपाठकैः ॥१०॥ इति केशवव्याख्याशिक्षा समाप्तः ॥
शाके १६९८ दुर्मुखनामाब्दे चैत्रकृष्ण ७ गुरवासरे इदं [illegible] कार्यार्थं वा परोप
कारार्थं श्रीशुभं भवतु ॥ लिखितं [illegible] रामजविष्णुभट्ट बाळापुरकरेणेदं समाप्तं ॥छ॥

॥८॥

K K S U LIBRARY
RAMTEK
441 106
M-1733
Dist Nagpur

```
[OrderDescription]
,CREATED=05.10.20 12:59
,TRANSFERRED=2020/10/05 at 14:05:45
,PAGES=13
,TYPE=STD
,NAME=S0003856
,Book Name=M-1733-VYAKHYA SIKSHA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,
```